॥ শিৱানন্দ লহরি ॥

কলাভ্যাং চূডালঙকৃতশশিকলাভ্যাং নিজতপঃ-
ফলাভ্যাং ভক্তেষু প্রকটিতফলাভ্যাং ভৱতু মে ।
শিৱাভ্যামস্তোকত্রিভুৱনশিৱাভ্যাং হৃদি পুন-
রভৱাভ্যামানন্দস্ফুরদনুভৱাভ্যাং নতিরিযম্ ॥ ১॥

গলন্তী শংভো ত্ৱচ্চরিতসরিতঃ কিল্বিষরজো
দলন্তী ধীকুল্যাসরণিষু পতন্তী ৱিজযতাম্ ।
দিশন্তী সংসারভ্রমণপরিতাপোপশমনং
ৱসন্তী মচ্চেতোহৃদভুৱি শিৱানন্দলহরী ॥ ২॥

ত্রযীৱেদ্যং হৃদ্যং ত্রিপুরহরমাদ্যং ত্রিনযনং
জটাভারোদারং চলদুরগহারং মৃগধরম্ ।
মহাদেৱং দেৱং মযি সদযভাৱং পশুপতিং
চিদালম্বং সাম্বং শিৱমতিৱিডম্বং হৃদি ভজে ॥ ৩॥

সহস্রং ৱরতন্তে জগতি ৱিবুধাঃ ক্ষুদ্রফলদা
ন মন্যে স্ৱপ্নে ৱা তদনুসরণং তত্কৃতফলম্ ।
হরিব্রহমাদীনামাপি নিকটভাজামসুলভং
চিরং যাচে শংভো তৱ পদাংভোজভজনম্ ॥ ৪॥

স্মৃতৌ শাস্ত্রে ৱৈদ্যে শকুনকৱিতাগানফণিতৌ
পুরাণে মন্ত্রে ৱা স্তুতিনটনহাস্যেষ্ৱচতুরঃ ।
কথং রাজ্ঞাং প্রীতিরভৱতি মযি কোহং পশুপতে
পশুং মাং সরৱজ্ঞ প্রথিত কৃপযা পালয ৱিভো ॥ ৫॥

ঘটো ৱা মৃত্পিণ্ডোপ্যণুরপি চ ধূমোগ্নিরচলঃ
পটো ৱা তন্তুরৱা পরিহরতি কিং ঘোরশমনম্ ।
ৱৃথা কন্ঠক্ষোভং ৱহসি তরসা তরকৱচসা
পদাম্ভোজং শংভোরভজ পরমসৌখ্যং ৱরজ সুধীঃ ॥ ৬॥

মনস্তে পাদাব্জে নিৱসতু ৱচঃ স্তোত্রফণিতৌ
করৌ চাভ্যরচাযাং শ্রুতিরপি কথাকরণনৱিধৌ ।
তৱ ধ্যানে বুদ্ধিরনযনযুগলং মূরিতৱিভৱে
পরগ্রনথান্ কৈরৱা পরমশিৱ জানে পরমতঃ ॥ ৭॥

যথা বুদ্ধিঃ শুক্তৌ রজতমিতি কাচাশ্মনি মণি-
রজলে পৈষ্টে ক্ষীরং ভৱতি মৃগতৃষ্ণাসু সলিলম্ ।
তথা দেৱভ্রান্ত্যা ভজতি ভৱদন্যং জডজনো
মহাদেৱেশং ত্ৱাং মনসি চ ন মত্ৱা পশুপতে ॥ ৮॥

গভীরে কাসারে ৱিশতি ৱিজনে ঘোরৱিপিনে
ৱিশালে শৈলে চ ভ্রমতি কুসুমারথং জডমতিঃ ।
সমরৈপ্যকং চেতঃ সরসিজমুমানাথ ভৱতে
সুখেনাৱস্থাতুং জন ইহ ন জানাতি কিমহো ॥ ৯॥

নরত্ৱং দেৱত্ৱং নগৱনমৃগত্ৱং মশকতা
পশুত্ৱং কীটত্ৱং ভৱতু ৱিহগত্ৱাদি জননম্ ।
সদা ত্ৱতপাদাব্জস্মরণপরমানন্দলহরী-
ৱিহারাসক্তং চেদ্ধৃদযমিহ কিং তেন ৱপুষা ॥ ১০॥

ৱটুরৱা গেহী ৱা যতিরপি জটী ৱা তদিতরো
নরো ৱা যঃ কশ্চিদ্ভৱতু ভৱ কিং তেন ভৱতি ।
যদীযং হৃত্পদ্মং যদি ভৱদধীনং পশুপতে
তদীযস্ত্ৱং শংভো ভৱসি ভৱভারং চ ৱহসি ॥ ১১॥

গুহাযাং গেহে ৱা বহিরপি ৱনে ৱাদ্রিশিখরে
জলে ৱা ৱহ্নৌ ৱা ৱসতু ৱসতেঃ কিং ৱদ ফলম্ ।
সদা যস্যৈৱান্তঃকরণমপি শংভো তৱ পদে
স্থিতং চেদ্যোগোসৌ স চ পরমযোগী স চ সুখী ॥ ১২॥

অসারে সংসারে নিজভজনদূরে জডধিযা

ভ্রমন্তং মামন্ধং পরমকৃপযা পাতুমুচিতম্ ।
মদন্যঃ কো দীনস্তৱ কৃপণরক্ষাতিনিপুণ-
স্তৱদন্যঃ কো ৱা মে ত্রিজগতি শরণ্যঃ পশুপতে ॥ ১৩॥

প্রভুস্তৱং দীনানাং খলু পরমবন্ধুঃ পশুপতে
প্রমুখ্যোহং তেষামপি কিমুত বন্ধুত্ৱমনযোঃ ।
ত্ৱযৈৱ ক্ষন্তৱযাঃ শিৱ মদপরাধাশ্চ সকলাঃ
প্রযত্নাত্করতৱযং মদৱনমিযং বন্ধুসরণিঃ ॥ ১৪॥

উপেক্ষা নো চেৎ কিং ন হরসি ভৱদ্ধ্যানৱিমুখাং
দুরাশাভূযিষ্ঠাং ৱিধিলিপিমশক্তো যদি ভৱান্ ।
শিরস্তদ্দৈৱধাত্রং ন নখলু সুৱৃত্তং পশুপতে
কথং ৱা নির্যত্নং করনখমুখেনৈৱ লুলিতম্ ॥ ১৫॥

ৱিরিঞ্চিরদীরঘাযুরভৱতু ভৱতা তত্পরশির-
শ্চতুষ্কং সংরক্ষ্যং স খলু ভুৱি দৈন্যং লিখিতৱান্ ।
ৱিচারঃ কো ৱা মাং ৱিশদ কৃপযা পাতি শিৱ তে
কটাক্ষৱযাপারঃ স্ৱযমপি চ দীনাৱনপরঃ ॥ ১৬॥

ফলাদ্ৱা পুণ্যানাং মযি করুণযা ৱা ত্ৱযি ৱিভো
প্রসন্নেপি স্ৱামিন্ ভৱদমলপাদাব্জযুগলম্ ।
কথং পশ্যেযং মাং স্থগযতি নমঃ সংভ্রমজুষাং
নিলিম্পানাং শ্রোণির্নিজকনকমাণিক্যমকুটৈঃ ॥ ১৭॥

ত্ৱমেকো লোকানাং পরমফলদো দিৱযপদৱীং
ৱহন্তস্ত্ৱন্মূলাং পুনরপি ভজন্তে হরিমুখাঃ ।
কিযদ্ৱা দাক্ষিণ্যং তৱ শিৱ মদাশা চ কিযতী
কদা ৱা মদ্রক্ষাং ৱহসি করুণাপূরিতদৃশা ॥ ১৮॥

দুরাশাভূযিষ্ঠে দুরধিপগৃহদ্ৱারঘটকে
দুরন্তে সংসারে দুরিতনিলযে দুঃখজনকে ।
মদাযাসং কিং ন ৱযপনযসি কস্যোপকৃতযে
ৱদেযং প্রীতিশ্চেত্তৱ শিৱ কৃতারথাঃ খলু ৱযম্ ॥ ১৯॥

সদা মোহাটৱযাং চরতি যুৱতীনাং কুচগিরৌ
নটত্যাশাশাখাস্ৱটতি ঝটিতি স্ৱৈরমভিতঃ ।
কপালিন্ ভিক্ষো মে হৃদযকপিমত্যন্তচপলং
দৃঢং ভক্ত্যা বদ্ধৱা শিৱ ভৱদধীনং কুরু ৱিভো ॥ ২০॥

ধৃতিস্তংভাধারাং দৃঢগুণনিবদ্ধাং সগমনাং
ৱিচিত্রাং পদ্মাঢ্যাং প্রতিদিৱসসন্মারগঘটিতাম্ ।
স্মরারে মচ্চেতঃস্ফুটপটকুটীং প্রাপ্য ৱিশদাং
জয স্ৱামিন্ শক্ত্যা সহ শিৱগণৈঃ সেৱিত ৱিভো ॥ ২১॥

প্রলোভাদ্যৈররথাহরণপরতন্ত্রো ধনিগৃহে
প্রৱেশোদ্যুক্তস্সন্ ভ্রমতি বহুধা তস্করপতে ।
ইমং চেতশ্চোরং কথমিহ সহে শংকর ৱিভো
তৱাধীনং কৃত্ৱা মযি নিরপরাধে কুরু কৃপাম্ ॥ ২২॥

করোমি ত্ৱৎপূজাং সপদি সুখদো মে ভৱ ৱিভো
ৱিধিত্ৱং ৱিষ্ণুত্ৱং দিশসি খলু তস্যাঃ ফলমিতি ।
পুনশ্চ ত্ৱাং দ্রষ্টুং দিৱি ভুৱি ৱহন্ পক্ষিমৃগতা-
মদৃষ্ট্ৱা তত্খেদং কথমিহ সহে শংকর ৱিভো ॥ ২৩॥

কদা ৱা কৈলাসে কনকমণিসৌধে সহগণৈ-
রৱসন্ শংভোরগ্রে স্ফুটঘটিতমূরধাঞ্জলিপুটঃ ।
ৱিভো সাম্ব স্ৱামিন্ পরমশিৱ পাহীতি নিগদন্
ৱিধাণাং কল্পান্ ক্ষণমিৱ ৱিনেষ্যামি সুখতঃ ॥ ২৪॥

স্তৱৈরব্রহমাদীনাং জযজযৱচোভিরিনযমিনাং

গণানাং কেলীভিরমদকলমহোক্ষস্য ককুদি ।
স্থিতং নীলগ্রীৰং ত্রিনযনমুমাশ্লিষ্টৰপুষং
কদা ত্ৰাং পশ্যেযং করধৃতমৃগং খণ্ডপরশুম্ ॥ ২৫॥

কদা ৰা ত্ৰাং দৃষ্টৰা গিরিশ তৰ ভৰ্যাঙ্ঘ্রিযুগলং
গৃহীত্ৰা হস্তাভ্যাং শিরসি নযনে ৰক্ষসি ৰহন্ ।
সমাশ্লিষ্যাঘ্রায স্ফুটজলজগন্ধান্ পরিমলা-
নলাভ্যাং ব্রহ্মাদ্যৈরমুদমনুভৰিষ্যামি হৃদযে ॥ ২৬॥

করস্থে হেমাদ্রৌ গিরিশ নিকটস্থে ধনপতৌ
গৃহস্থে স্ৰরভূজামরসুরভিচিন্তামণিগণে ।
শিরস্থে শীতাংশৌ চরণযুগলস্থেখিলশুভে
কমরথং দাস্যেহং ভৰতু ভৰদরথং মম মনঃ ॥ ২৭॥

সারূপ্যং তৰ পূজনে শিৰ মহাদেৰেতি সংকীরতনে
সামীপ্যং শিৰভক্তিধুর্যজনতাসাংগত্যসংভাষণে ।
সালোক্যং চ চরাচরাত্মকতনুধ্যানে ভৰানীপতে
সাযুজ্যং মম সিদ্ধমত্র ভৰতি স্ৰামিন্ কৃতারেথাস্ম্যহম্
॥ ২৮॥

ত্ৰৎপাদাম্বুজমরচযামি পরমং ত্ৰাং চিন্তযাম্যন্ৰহং
ত্ৰামীশং শরণং ৰরজামি ৰচসা ত্ৰামেৰ যাচে ৰিভো ।
ৰীক্ষাং মে দিশ চাক্ষুষীং সকরুণাং দিৰৈযশ্চিরং প্রারিথতাং
শংভো লোকগুরো মদীযমনসঃ সৌখ্যোপদেশং কুরু ॥ ২৯॥

ৰস্ত্রোদ্ধূতৰিধৌ সহস্রকরতা পুষ্পারচনে ৰিশুতা
গন্ধে গন্ধৰহাত্মতান্নপচনে বরিহিরমুখাধ্যক্ষতা ।
পাত্রে কাঞ্চনগরভতাস্তি মযি চেদ্ বালেন্দুচূডামণে
শুশ্রূষাং করৰাণি তে পশুপতে স্ৰামিন্ ত্রিলোকীগুরো ॥ ৩০॥

নালং ৰা পরমোপকারকমিদং ত্ৰেকং পশূনাং পতে

পশ্যন্ কুক্ষিগতান্ চরাচরগণান্ বাহ্যস্থিতান্ রক্ষিতুম্ ।
সর্ৱামরত্যপলাযনৌষধমতিজ্ৱালাকরং ভীকরং
নিক্ষিপ্তং গরলং গলে ন গিলিতং নোদ্গীরণমেৱ ত্ৱযা ॥ ৩১॥

জ্ৱালোগ্রঃ সকলামরাতিভযদঃ ক্ষেৱলঃ কথং ৱা ত্ৱযা
দৃষ্টঃ কিং চ করে ধৃতঃ করতলে কিং পক্ৱজংবূফলম্ ।
জিহৱাযাং নিহিতশ্চ সিদ্ধঘুটিকা ৱা কন্ঠদেশে ভৃতঃ
কিং তে নীলমণির্িরিৱভূষণমযং শংভো মহাত্মন্ ৱদ ॥ ৩২॥

নালং ৱা সকৃদেৱ দেৱ ভৱতঃ সেৱা নতির্ৱা নুতিঃ
পূজা ৱা স্মরণং কথাশ্রৱণমপ্যালোকনং মাদৃশাম্ ।
স্ৱামিন্নস্থিরদেৱতানুসরণাযাসেন কিং লভ্যতে
কা ৱা মুক্তিরিতঃ কুতো ভৱতি চেৎ কিং প্রার্থনীযং তদা
॥ ৩৩॥

কিং ব্রূমস্তৱ সাহসং পশুপতে কস্যাস্তি শংভো ভৱ-
দ্ধৈর্য্যং চেদৃশমাত্মনঃ স্থিতিরিযং চান্যৈঃ কথং লভ্যতে ।
ভ্রশ্যদ্দেৱগণং ত্রসন্মুনিগণং নশ্যত্প্রপঞ্চং লযং
পশ্যন্নির্ভয এক এৱ ৱিহরত্যানন্দসান্দ্রো ভৱান্ ॥ ৩৪॥

যোগক্ষেমধুরংধরস্য সকলশ্রেযঃপ্রদোদ্যোগিনো
দৃষ্টাদৃষ্টমতোপদেশকৃতিনো বাহ্যান্তরৱ্যাপিনঃ ।
সর্ৱজ্ঞস্য দযাকরস্য ভৱতঃ কিং ৱেদিতৱ্যং মযা
শংভো ত্ৱং পরমান্তরঙ্গ ইতি মে চিত্তে স্মরাম্যন্ৱহম্ ॥ ৩৫॥

ভক্তো ভক্তিগুণাৱৃতে মুদমৃতাপূর্ণে প্রসন্নে মনঃ
কুম্ভে সাম্ব তৱাঙ্ঘ্রিপল্লৱযুগং সংস্থাপ্য সংৱিত্ফলম্ ।
সত্ত্ৱং মন্ত্রমুদীরযন্নিজশরীরাগারশুদ্ধিং ৱহন্
পুণ্যাহং প্রকটীকরোমি রুচিরং কল্যাণমাপাদযন্ ॥ ৩৬॥

আম্নাযাম্বুধিমাদরেণ সুমনস্সংঘাঃ সমুদ্যন্মনো

মন্থানং দৃঢভক্তিরজ্জুসহিতং কৃত্ৱা মথিত্ৱা ততঃ ।
সোমং কল্পতরুং সুপৰ্ৱসুরভিং চিন্তামণিং ধীমতাং
নিত্যানন্দসুধাং নিরন্তররমাসৌভাগ্যমাতন্ৱতে ॥ ৩৭॥

প্রাক্পুণ্যাচলমারগদরিশতসুধামুরিতঃপ্রসন্নঃ শিৱঃ
সোমঃ সদ্গুণসেৱিতো মৃগধরঃ পূরণস্তমোমোচকঃ ।
চেতঃ পুষ্করলক্ষিতো ভৱতি চেদানন্দপাথোনিধিঃ
প্রাগল্ভ্যেন ৱিজৃম্ভতে সুমনসাং ৱৃত্তিস্তদা জাযতে ॥ ৩৮॥

ধরেমা মে চতুরঙিঘ্রকঃ সুচরিতঃ পাপং ৱিনাশং গতং
কামক্রোধমদাদযো ৱিগলিতাঃ কালাঃ সুখাৱিষ্কৃতাঃ ।
জ্ঞানানন্দমহৌষধিঃ সুফলিতা কৈৱল্যনাথে সদা
মান্যে মানসপুণ্ডরীকনগরে রাজাৱতংসে স্থিতে ॥ ৩৯॥

ধীযন্ত্রেণ ৱচোঘটেন কৱিতাকুল্যোপকুল্যাক্রমৈ-
রানীতৈশ্চ সদাশিৱস্য চরিতাম্ভোরাশিদিৱ্যামৃতৈঃ ।
হৃত্কেদারযুতাশ্চ ভক্তিকলমাঃ সাফল্যমাতন্ৱতে
দুরিভক্ষান্ মম সেৱকস্য ভগৱন্ ৱিশ্বেশ ভীতিঃ কুতঃ ॥ ৪০॥

পাপোত্পাতৱিমোচনায রুচিরৈশ্ৱর্যায মৃত্যুংজয
স্তোত্রধ্যাননতিপ্রদক্ষিণসপর্যালোকনাকরণনে ।
জিহৱাচিত্তশিরোঙ্ঘ্রিহস্তনযনশ্রোত্রৈরহং প্রারিথতো
মামাজ্ঞাপয তন্নিরূপয মুহুরমামেৱ মা মেৱচঃ ॥ ৪১॥

গাম্ভীর্যং পরিখাপদং ঘনধৃতিঃ প্রাকার উদ্যদ্গুণ-
স্তোমশ্চাপ্তবলং ঘনেন্দ্রিযচযো দ্ৱারাণি দেহে স্থিতঃ ।
ৱিদ্যাৱস্তুসমৃদ্ধিরিত্যখিলসামগ্রীসমেতে সদা
দুরগাতিপ্রিযদেৱ মামকমনোদুরেগ নিৱাসং কুরু ॥ ৪২॥

মা গচ্ছ ত্ৱমিতস্ততো গিরিশ ভো ময্যেৱ ৱাসং কুরু
স্ৱামিন্নাদিকিরাত মামকমনঃকান্তারসীমান্তরে ।

ৰরতন্তে বহুশো মৃগা মদজুষো মাত্সর্য্মোহাদয-
স্তান্ হত্ৰা মৃগযাৰিনোদরুচিতালাভং চ সংপ্রাপ্স্যসি
॥ ৪৩॥

করলগ্নমৃগঃ করীন্দ্রভঙ্গো
ঘনশারদূলৰিখণ্ডনোস্তজন্তুঃ ।
গিরিশো ৰিশদাকৃতিশ্চ চেতঃ-
কুহরে পঞ্চমুখোস্তি মে কুতো ভীঃ ॥ ৪৪॥

ছন্দঃশাখিশিখান্ৰিতৈরিদ্ৰজৰরৈঃ সংসেৰিতে শাশ্ৰতে
সৌখ্যাপাদিনি খেদভেদিনি সুধাসারৈঃ ফলৈরদীপিতে ।
চেতঃপক্ষিশিখামণে ত্যজ ৰৃথাসংচারমন্যৈরলং
নিত্যং শংকরপাদপদ্মযুগলীনীডে ৰিহারং কুরু ॥ ৪৫॥

আকীরেণ নখরাজিকান্তিৰিভৰৈরুদ্যত্সুধাৰৈভৰৈ-
রাধৌতেপি চ পদ্মরাগললিতে হংসৰরজৈরাশ্রিতে ।
নিত্যং ভক্তিৰধুগণৈশ্চ রহসি স্ৰেচ্ছাৰিহারং কুরু
স্থিত্ৰা মানসরাজহংস গিরিজানাথাঙ্ঘ্রিসৌধান্তরে ॥ ৪৬॥

শংভুধ্যানৰসন্তসংগিনি হৃদারামেঘজীরণচ্ছদাঃ
স্রস্তা ভক্তিলতাচ্ছটা ৰিলসিতাঃ পুণ্যপ্রৰালশ্রিতাঃ ।
দীপ্যন্তে গুণকোরকা জপৰচঃপুষ্পাণি সদ্ৰাসনা
জ্ঞানানন্দসুধামরন্দলহরী সংৰিত্ফলাভ্যুন্নতিঃ ॥ ৪৭॥

নিত্যানন্দরসালযং সুরমুনিস্ৰান্তাম্বুজাতাশ্রযং
স্ৰচ্ছং সদ্দ্ৰিজসেৰিতং কলুষহৃত্সদ্ৰাসনাৰিষ্কৃতম্ ।
শংভুধ্যানসরোৰরং ৰরজ মনো হংসাৰতংস স্থিরং
কিং ক্ষুদ্রাশ্রযপল্ৰলভ্রমণসংজাতশ্রমং প্রাপ্স্যসি ॥ ৪৮॥

আনন্দামৃতপূরিতা হরপদাম্ভোজালৰালোদ্যতা
স্থৈর্যোপঘ্নমুপেত্য ভক্তিলতিকা শাখোপশাখান্ৰিতা ।

উচ্চৈৰমানসকাযমানপটলীমাক্রম্য নিষ্কল্মষা
নিত্যাভীষ্টফলপ্রদা ভৱতু মে সত্করমসংৱরিধতা ॥ ৪৯॥

সন্ধ্যারংভৱিজৃম্ভিতং শ্রুতিশিরস্থানান্তরাধিষ্ঠিতং
সপ্রেমভ্রমরাভিরামমসকৃৎ সদ্ৱাসনাশোভিতম্ ।
ভোগীন্দ্রাভরণং সমস্তসুমনঃপূজ্যং গুণাৰিষ্কৃতং
সেৱে শ্রীগিরিমল্লিকারজুনমহালিঙ্গং শিৱালিঙ্গিতং ॥ ৫০॥

ভৃংগীচ্ছানটনোত্কটঃ করমদিগ্রাহী স্ফুরন্মাধৱা-
হ্লাদো নাদযুতো মহাসিতৱপুঃ পঞ্চেষুণা চাদৃতঃ ।
সত্পক্ষঃ সুমনোৱনেষু স পুনঃ সাক্ষান্মদীযে মনো-
রাজীৱে ভ্রমরাধিপো ৱিহরতাং শ্রীশৈলৱাসী ৱিভুঃ ॥ ৫১।

কারুণ্যামৃতৱরিষণং ঘনৱিপদ্গ্রীষ্মচ্ছিদাকরমঠং
ৱিদ্যাসস্যফলোদযায সুমনঃসংসেৱযমিচ্ছাকৃতিম্ ।
নৃত্যদ্ভক্তমযূরমদ্রিনিলযং চঞ্চজ্জটামণ্ডলং
শংভো ৱাঞ্ছতি নীলকন্ধর সদা ত্ৱাং মে মনশ্চাতকঃ
॥ ৫২॥

আকাশেন শিখী সমস্তফণিনাং নেত্রা কলাপী নতা-
নুগ্রাহিপ্রণৱোপদেশনিনদৈঃ কেকীতি যো গীযতে ।
শ্যামাং শৈলসমুদ্ভৱাং ঘনরুচিং দৃষ্ট্ৱা নটন্তং মুদা
ৱেদান্তোপৱনে ৱিহাররসিকং তং নীলকন্ঠং ভজে ॥ ৫৩॥

সন্ধ্যাঘরমদিনাত্যযো হরিকরাঘাতপ্রভূতানক-
ধ্ৱানো ৱারিদগরিজতং দিৱিষদাং দৃষ্টিচ্ছটা চঞ্চলা ।
ভক্তানাং পরিতোষবাষ্পৱিততিরৱৃষ্টিরমযূরী শিৱা
যস্মিন্নুজ্জৱলতাণ্ডৱং ৱিজযতে তং নীলকন্ঠং ভজে ॥ ৫৪॥

আদ্যাযামিততেজসে শ্রুতিপদৈরেৱদ্যায সাধ্যায তে
ৱিদ্যানন্দমযাত্মনে ত্রিজগতঃ সংরক্ষণোদ্যোগিনে ।

ধ্যেযাযাখিলযোগিভিঃ সুরগণৈরেগযায মাযাৱিনে
সম্যক্তাণ্ডৱসংভ্রমায জটিনে সেযং নতিঃ শংভৱে ॥ ৫৫॥

নিত্যায ত্রিগুণাত্মনে পুরজিতে কাত্যাযনীশ্রেযসে
সত্যাযাদিকুটুম্বিনে মুনিমনঃ প্রত্যক্ষচিন্মূরতযে ।
মাযাসৃষ্টজগত্ত্রযায সকলাম্নাযান্তসংচারিণে
সাযং তাণ্ডৱসংভ্রমায জটিনে সেযং নতিঃ শংভৱে ॥ ৫৬॥

নিত্যং স্ৱোদরপোষণায সকলানুদ্দিশ্য ৱিত্তাশযা
ৱ্যরথং পর্যটনং করোমি ভৱতঃ সেৱাং ন জানে ৱিভো ।
মজ্জন্মান্তরপুণ্যপাকবলতস্ত্ৱং শরৱ সরৱান্তর-
স্তিষ্ঠস্যেৱ হি তেন ৱা পশুপতে তে রক্ষনীযোস্ম্যহম্ ॥ ৫৭॥

একো ৱারিজবান্ধৱঃ ক্ষিতিনভো ৱ্যাপ্তং তমোমণ্ডলং
ভিত্ৱা লোচনগোচরোপি ভৱতি ত্ৱং কোটিসুর্যপ্রভঃ ।
ৱেদ্যঃ কিন্ন ভৱস্যহো ঘনতরং কীদৃগ্ভৱেন্মত্তম-
স্তত্সরৱং ৱ্যপনীয মে পশুপতে সাক্ষাত প্রসন্নো ভৱ ॥ ৫৮॥

হংসঃ পদ্মৱনং সমিচ্ছতি যথা নীলাম্বুদং চাতকঃ
কোকঃ কোকনদপ্রিযং প্রতিদিনং চন্দ্রং চকোরস্তথা ।
চেতো ৱাঞ্ছতি মামকং পশুপতে চিন্মারগমৃগ্যং ৱিভো
গৌরীনাথ ভৱত্পদাব্জযুগলং কৈৱল্যসৌখ্যপ্রদম্ ॥ ৫৯॥

রোধস্তোযহৃতঃ শ্রমেণ পথিকশ্ছাযাং তরোরৱৃষ্টিতো
ভীতঃ স্ৱস্থগৃহং গৃহস্থমতিথিরদীনঃ প্রভুং ধারিমকম্ ।
দীপং সন্তমসাকুলশ্চ শিখিনং শীতাৱৃতস্ত্ৱং তথা
চেতঃ সরৱভযাপহং ৱ্রজ সুখং শংভোঃ পদাম্ভোরুহম্ ॥ ৬০॥

অঙ্কোলং নিজবীজসন্ততিরযস্কান্তোপলং সুচিকা
সাধ্ৱী নৈজৱিভুং লতা ক্ষিতিরুহং সিন্ধুঃ সরিদ্ৱল্লভম্ ।
প্রাপ্নোতীহ যথা তথা পশুপতেঃ পাদারৱিন্দদ্ৱযং

চেতোবৃত্তিরুপেত্য তিষ্ঠতি সদা সা ভক্তিরিত্যুচ্যতে ॥ ৬১॥

আনন্দাশ্রুভিরাতনোতি পুলকং নৈরমল্যতচ্ছাদনং
ৰাচা শঙ্খমুখে স্থিতৈশ্চ জঠরাপুরিতং চরিত্রামৃতৈঃ ।
রুদ্রাক্ষৈরভসিতেন দেৱ ৰপুষো রক্ষাং ভৱদ্ভাৱনা-
পর্য্যঙ্কে ৱিনিৱেশ্য ভক্তিজননী ভক্তারভকং রক্ষতি ॥ ৬২॥

মারগাৱরিততপাদুকা পশুপতেরঙ্গস্য কূরচাযতে
গণ্ডুষাংবুনিষেচনং পুররিপোরিদৱযাভিষেকাযতে ।
কিংচিদ্ভক্ষিতমাংসশেষকবলং নৱেযাপহারাযতে
ভক্তিঃ কিং ন করোত্যহো ৱনচরো ভক্তাৱতংসাযতে ॥ ৬৩॥

ৱক্ষস্তাডনমন্তকস্য কঠিনাপস্মারসংমরদনং
ভূভৃত্পর্য্যটনং নমস্সুরশিরঃকোটীরসংঘরষণম্ ।
করেমদং মৃদুলস্য তাৱকপদদ্ৱন্দৱস্য গৌরীপতে
মচ্চেতোমণিপাদুকাৱিহরণং শংভো সদাঙ্গীকুরু ॥ ৬৪॥

ৱক্ষস্তাডনশঙকযা ৱিচলিতো ৱৈৱস্ৱতো নিরজরাঃ
কোটীরোজজ্ৱলরত্নদীপকলিকানীরাজনং কুরৱতে ।
দৃষ্টৱা মুক্তিৱধুস্তনোতি নিভৃতাশ্লেষং ভৱানীপতে
যচ্চেতস্তৱ পাদপদ্মভজনং তস্যেহ কিং দুরলভম্ ॥ ৬৫॥

ক্রীডারথং সৃজসি প্রপঞ্চমখিলং ক্রীডামৃগাস্তে জনাঃ
যত্করমাচরিতং মযা চ ভৱতঃ প্রীত্যৈ ভৱত্যেৱ তৎ ।
শংভো স্ৱস্য কুতূহলস্য করণং মচ্চেষ্টিতং নিশ্চিতং
তস্মান্মামকরক্ষণং পশুপতে করতৱযমেৱ ত্ৱযা ॥ ৬৬॥

বহুৱিধপরিতোষবাষ্পপুর-
স্ফুটপুলকাঙিকতচারুভোগভূমিম্ ।
চিরপদফলকাঙিক্ষসেৱযমানাং
পরমসদাশিৱভাৱনাং প্রপদ্যে ॥ ৬৭॥

অমিতমুদমৃতং মুহুরদুহন্তীং
ৰিমলভৰত্পদগোষ্ঠমাৰসন্তীম্ ।
সদয পশুপতে সুপুণ্যপাকাং
মম পরিপালয ভক্তিধেনুমেকাম্ ॥ ৬৮॥

জডতা পশুতা কলঙ্কিতা
কুটিলচরত্ৰং চ নাস্তি মযি দেৰ ।
অস্তি যদি রাজমৌলে
ভৰদাভরণস্য নাস্মি কিং পাত্রম্ ॥ ৬৯॥

অরহসি রহসি স্ৰতন্ত্রবুদ্ধ্যা
ৰরিৰসিতুং সুলভঃ প্রসন্নমুরিতঃ ।
অগণিতফলদাযকঃ প্রভুরেম
জগদধিকো হৃদি রাজশেখরোস্তি ॥ ৭০॥

আরূঢভক্তিগুণকুঞ্চিতভাৰচাপ-
যুক্তৈঃ শিৰস্মরণবাণগণৈরমোঘৈঃ ।
নিরিজত্য কিল্বিষরিপূন্ ৰিজযী সুধীন্দ্রঃ
সানন্দমাৰহতি সুস্থিররাজলক্ষমীম্ ॥ ৭১॥

ধ্যানাঞ্জনেন সমৰেক্ষ্য তমঃপ্রদেশং
ভিত্ৰা মহাবলিভিরীশ্ৰরনামমন্ত্রৈঃ ।
দিৰযাশ্রিতং ভুজগভূষণমুদ্ৰহন্তি
যে পাদপদ্মমিহ তে শিৰ তে কৃতারথাঃ ॥ ৭২॥

ভূদারতামুদৰহদ্যদপেক্ষযা শ্রী-
ভূদার এৰ কিমতঃ সুমতে লভস্ৰ ।
কেদারমাকলিতমুক্তিমহৌষধীনাং
পাদারৰিন্দভজনং পরমেশ্ৰরস্য । ৭৩॥

আশাপাশক্লেশদুরৰাসনাদি-

ভেদোদ্যুক্তৈরিদৰযগন্ধৈরমন্দৈঃ ।
আশাশাটীকস্য পাদারৱিন্দং
চেতঃপেটীং ৰাসিতাং মে তনোতু ॥ ৭৪॥

কল্যাণিনাং সরসচিত্রগতিং সৱেগং
সরেৰঙ্গিতজ্ঞমনঘং ধ্রুৰলক্ষণাঢ্যম্ ।
চেতস্তুরঙ্গমধিরুহ্য চর স্মরারে
নেতঃ সমস্তজগতাং ৰৃষভাধিরূঢ ॥ ৭৫॥

ভক্তিরমহেশপদপুষ্করমাৱসন্তী
কাদম্বিনীৱ কুরুতে পরিতোষৱরষম্ ।
সংপূরিতো ভৱতি যস্য মনস্তটাক-
স্তজ্জন্মসস্যমখিলং সফলং চ নান্যৎ ॥ ৭৬॥

বুদ্ধিঃস্থিরা ভৱিতুমীশ্ৱরপাদপদ্ম-
সক্তা ৱধূরিৱরহিণীৱ সদা স্মরন্তী ।
সদ্ভাৱনাস্মরণদরশনকীরতনাদি
সংমোহিতেৱ শিৱমন্ত্রজপেন ৱিন্তে ॥ ৭৭॥

সদুপচারৱিধিষ্ৱনুবোধিতাং
সৱিনযাং সহৃদযং সদুপাশ্রিতাম্ ।
মম সমুদ্ধর বুদ্ধিমিমাং প্রভো
ৱরগুণেন নৱোঢৱধূমিৱ ॥ ৭৮॥

নিত্যং যোগিমনঃ সরোজদলসঞ্চারক্ষমস্তৱৎক্রমঃ
শংভো তেন কথং কঠোরযমরাড্ৱক্ষঃকৱাটক্ষতিঃ ।
অত্যন্তং মৃদুলং ত্ৱদঙ্ঘ্রিযুগলং হা মে মনশ্চিন্তয-
ত্যেতল্লোচনগোচরং কুরু ৱিভো হস্তেন সংৱাহযে ॥ ৭৯।

এষ্যত্যেষ জনিং মনোস্য কঠিনং তস্মিন্নটানীতি ম-
দ্রক্ষাযৈ গিরিসীম্নি কোমলপদন্যাসঃ পুরাভ্যাসিতঃ ।

নোচেদ্দিৰযগৃহান্তরেষু সুমনস্তল্পেষু ৰেদ্যাদিষু
প্রাযঃ সত্সু শিলাতলেষু নটনং শংভো কিমরথং তৱ ॥ ৮০॥

কংচিত্কালমুমামহেশ ভৱতঃ পাদারৱিন্দারচনৈঃ
কংচিদ্ধ্যানসমাধিভিশ্চ নতিভিঃ কংচিত্কথাকরণনৈঃ ।
কংচিৎ কংচিদৱেক্ষনৈশ্চ নুতিভিঃ কংচিদ্দশামীদৃশীং
যঃ প্রাপ্নোতি মুদা ত্ৱদরিপতমনা জীৱন্ স মুক্তঃ খলু
॥ ৮১॥

বাণত্ৱং ৱৃষভত্ৱমরধৰপুষা ভার্যাত্ৱমার্যাপতে
ঘোণিত্ৱং সখিতা মৃদঙ্গৱহতা চেত্যাদি রূপং দধৌ ।
ত্ৱত্পাদে নযনারপণং চ কৃতৱান্ ত্ৱদ্দেহভাগো হরিঃ
পূজ্যাত্পূজ্যতরঃ স এৱ হি ন চেৎ কো ৱা তদান্যোধিকঃ ॥ ৮২॥

জননমৃতিযুতানাং সেৱযা দেৱতানাং
ন ভৱতি সুখলেশঃ সংশযো নাস্তি তত্র ।
অজনিমমৃতরূপং সাম্বমীশং ভজন্তে
য ইহ পরমসৌখ্যং তে হি ধন্যা লভন্তে ॥ ৮৩॥

শিৱ তৱ পরিচর্যাসন্নিধানায গৌর্যা
ভৱ মম গুণধুর্যাং বুদ্ধিকন্যাং প্রদাস্যে ।
সকলভুৱনবন্ধো সচ্চিদানন্দসিন্ধো
সদয হৃদযগেহে সরৱদা সংৱস ত্ৱম্ ॥ ৮৪॥

জলধিমথনদক্ষো নৈৱ পাতালভেদী
ন চ ৱনমৃগযাযাং নৈৱ লুব্ধঃ প্রৱীণঃ ।
অশনকুসুমভূষাৱস্ত্রমুখ্যাং সপর্যাং
কথয কথমহং তে কল্পযানীন্দুমৌলে ॥ ৮৫॥

পূজাদ্রৱযসমৃদ্ধযো ৱিরচিতাঃ পূজাং কথং কুরমহে
পক্ষিত্ৱং ন চ ৱা কিটিত্ৱমপি ন প্রাপ্তং মযা দুরলভম্ ।

জানে মস্তকমঙ্ঘ্রিপল্লৱমুমাজানে ন তেহং ৱিভো
ন জ্ঞাতং হি পিতামহেন হরিণা তত্ত্বেন তদ্রূপিণা ॥ ৮৬॥

অশলং গরলং ফণী কলাপো
ৱসনং চরম চ ৱাহনং মহোক্ষঃ ।
মম দাস্যসি কিং কিমস্তি শংভো
তৱ পাদাম্বুজভক্তিমেৱ দেহি ॥ ৮৭॥

যদা কৃতাংভোনিধিসেতুবন্ধনঃ
করস্থলাধঃকৃতপরৱতাধিপঃ ।
ভৱানি তে লঙ্ঘিতপদ্মসংভৱঃ
তদা শিৱারচাস্তৱভাৱনক্ষমঃ ॥ ৮৮॥

নতিভিরনুতিভিস্তৱমীশপুজা-
ৱিধিভিরধ্যানসমাধিভিরন তুষ্টঃ ।
ধনুষা মুসলেন চাশ্মভিরৱা
ৱদ তে প্রীতিকরং তথা করোমি ॥ ৮৯॥

ৱচসা চরিতং ৱদামি শংভো-
রহমুদ্যোগৱিধাসু তেপ্রসক্তঃ ।
মনসা কৃতিমীশ্ৱরস্য সেৱে
শিরসা চৈৱ সদাশিৱং নমামি ॥ ৯০॥

আদ্যাৱিদ্যা হৃদ্গতা নিরগতাসী-
দ্ৱিদ্যা হৃদ্যা হৃদ্গতা ত্ৱত্প্রসাদাৎ ।
সেৱে নিত্যং শ্রীকরং ত্ৱত্পদাব্জং
ভাৱে মুক্তেরভাজনং রাজমৌলে ॥ ৯১॥

দুরীকৃতানি দুরিতানি দুরক্ষরাণি
দৌরভাগ্যদুঃখদুরহংকৃতিদুরৱচাংসি ।
সারং ত্ৱদীযচরিতং নিতরাং পিবন্তং

গৌরীশ মামিহ সমুদ্ধর সত্কটাক্ষৈঃ ॥ ৯২॥

সোমকলাধরমৌলৌ
কোমলঘনকন্ধরে মহামহসি ।
স্ৱামিনি গিরিজানাথে
মামকহৃদযং নিরন্তরং রমতাম্ ॥ ৯৩॥

সা রসনা তে নযনে
তাৱেৱ করৌ স এৱ কৃতকৃত্যঃ ।
যা যে যৌ যো ভরগং
ৱদতীক্ষেতে সদারচতঃ স্মরতি ॥ ৯৪॥

অতিমৃদুলৌ মম চরণা-
ৱতিকঠিনং তে মনো ভৱানীশ ।
ইতি ৱিচিকিত্সাং সংত্যজ
শিৱ কথমাসীদ্গিরৌ তথা প্রৱেশঃ ॥ ৯৫॥

ধৈর্যাঙকুশেন নিভৃতং
রভসাদাকৃষ্য ভক্তিশৃঙ্খলযা ।
পুরহর চরণালানে
হৃদযমদেভং বধান চিদ্যন্ত্রৈঃ ॥ ৯৬॥

প্রচরত্যভিতঃ প্রগল্ভৱৃত্ত্যা
মদৱানেষ মনঃ করী গরীযান্ ।
পরিগৃহ্য নযেন ভক্তিরজ্জ্ৱা
পরম স্থাণুপদং দৃঢং নযামুম্ ॥ ৯৭॥

সৱালংকারযুক্তাং সরলপদযুতাং সাধুৱৃত্তাং সুৱরণাং
সদ্ভিঃসংস্তূযমানাং সরসগুণযুতাং লক্ষিতাং লক্ষণাঢ্যাম্ ।
উদ্যদ্ভূষাৱিশেষামুপগতৱিনযাং দ্যোতমানারথরেখাং
কল্যাণীং দেৱ গৌরীপ্রিয মম কৱিতাকন্যকাং ত্ৱং গৃহাণ

॥ ৯৮॥

ইদং তে যুক্তং ৰা পরমশিৰ কারুণ্যজলধে
গতৌ তির্য্যগ্রূপং তৰ পদশিরোদরশনধিযা ।
হরিব্রহমাণৌ তৌ দিৰি ভুৰি চরন্তৌ শ্রমযুতৌ
কথং শংভো স্ৰামিন্ কথয মম ৰেদ্যোসি পুরতঃ ॥ ৯৯॥

স্তোত্রেণালমহং প্রৰচ্মি ন মৃষা দেৰা ৰিরিঞ্চাদযঃ
স্তুত্যানং গণনাপ্রসঙ্গসমযে ত্ৰামগ্রগণ্যং ৰিদুঃ ।
মাহাত্ম্যাগ্রৰিচারণপ্রকরণে ধানাতুষস্তোমৰ-
দ্ধূতাস্তৰাং ৰিদুরুত্তমোত্তমফলং শংভো ভৰত্সেৰকাঃ ॥ ১০০॥

॥ ইতি শ্রীমচ্ছঙ্করাচার্য্যৰিরচিত
শিৰানন্দলহরী সমাপ্তা ॥